# ॥ ગોપાલહૃદયસ્તોત્રમ્ ॥

.. gopAlahRidayastotram ..

sanskritdocuments.org

August 20, 2017

# .. gopAlahRidayastotram ..

# ॥ ગોપાલહૃદયસ્તોત્રમ્ ॥

## Sanskrit Document Information

Text title : gopAlahRidayastotram

File name : gopaalahriday.itx

Category : hRidaya, vishhnu, krishna

Location : doc_vishhnu

Author : Traditional

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : WebD

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Latest update : January 11, 2005

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ ગોપાલહૃદયસ્તોત્રમ્ ॥

વિષ્ણુહૃદયસ્તોત્રમ્

શ્રી ગણેશાય નમઃ ।
ૐ અસ્ય શ્રીગોપાલહૃદયસ્તોત્રમન્ત્રસ્ય । શ્રીભગવાન્ સઙ્કર્ષણ ઋષિઃ ।
ગાયત્રી છન્દઃ । ૐ બીજમ્ । લક્ષ્મીઃ શક્તિઃ । ગોપાલઃ પરમાત્મા દેવતા ।
પ્રદ્યુમ્નઃ કીલકમ્ । મનોવાક્કાયાર્જિતસર્વપાપક્ષયાર્થે
શ્રીગોપાલપ્રીત્યર્થે ગોપાલહૃદયસ્તોત્રજપે વિનિયોગઃ ।
શ્રીસઙ્કર્ષણ ઉવાચ ।
ૐ મમાગ્રતઃ સદા વિષ્ણુઃ પૃષ્ઠતશ્ચાપિ કેશવઃ ।
ગોવિન્દો દક્ષિણે પાર્શ્વે વામે ચ મધુસૂદનઃ ॥ ૧॥

ઉપરિષ્ટાત્તુ વૈકુણ્ઠો વારાહઃ પૃથિવીતલે ।
અવાન્તરદિશઃ પાતુ તાસુ સર્વાસુ માધવઃ ॥ ૨॥

ગચ્છતસ્તિષ્ઠતો વાપિ જાગ્રતઃ સ્વપતોઽપિ વા ।
નરસિંહકૃતાગુપ્તિર્વાસુદેવમયો હ્યયમ્ ॥ ૩॥

અવ્યક્તં ચૈવાસ્ય યોનિં વદન્તિ વ્યક્તં દેહં દીર્ઘમાયુર્ગતિશ્ચ ।
વહ્નિર્વક્ત્રં ચન્દ્રસૂર્યૌ ચ નેત્રે દિશઃ શ્રોતે ઘ્રાણમાયુશ્ચ વાયુમ્ ॥ ૪॥

વાચં વેદા હૃદયં વૈ નભશ્ચ પૃથ્વી પાદૌ તારકા રોમકૂપાઃ ।
અઙ્ગાન્યુપાઙ્ગાન્યધિદેવતા ચ વિદ્યાદુપસ્થં હિ તથા સમુદ્રમ્ ॥ ૫॥

તં દેવદેવં શરણં પ્રજાનાં યજ્ઞાત્મકં સર્વલોકપ્રતિષ્ઠમ્ ।
અજં વરેણ્યં વરદં વરિષ્ઠં બ્રહ્માણમીશં પુરુષં નમસ્તે ॥ ૬॥

આદ્યં પુરુષમીશાનં પુરુહૂતં પુરસ્કૃતમ્ ।
ઋતમેકાક્ષરં બ્રહ્મ વ્યક્તાસક્તં સનાતનમ્ ॥ ૭॥

મહાભારતમાખ્યાનં કુરુક્ષેત્રં સરસ્વતીમ્ ।
કેશવં ગાં ચ ગઙ્ગાં ચ કીર્તયેન્માં પ્રસીદતિ ॥ ૮॥

ૐ ભૂઃ પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ ભુવઃ પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ સ્વઃ પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।

ૐ મહઃ પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ જનઃ પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ તપઃ પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ સત્યં પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ ભૂર્ભુવઃ સ્વઃ પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ વાસુદેવાય પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ સઙ્કર્ષણાય પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ પ્રદ્યુમ્નાય પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ અનિરુદ્ધાય પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ હયગ્રીવાય પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ ભવાદ્ભવાય પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ કેશવાય પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ નારાયણાય પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ માધવાય પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ ગોવિન્દાય પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ વિષ્ણવે પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ મધુસૂદનાય પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ વૈકુણ્ઠાય પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ અચ્યુતાય પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ ત્રિવિક્રમાય પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ વામનાય પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ શ્રીધરાય પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ હૃષીકેશાય પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ પદ્મનાભાય પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ મુકુન્દાય પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ દામોદરાય પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ સત્યાય પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ ઈશાનાય પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ તત્પુરુષાય પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ પુરુષોત્તમાય પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ૐ શ્રી રામચન્દ્રાય પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।

ॐ શ્રી નૃસિંહાય પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ॐ અનન્તાય પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ॐ વિશ્વરૂપાય પુરુષાય પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ॐ પ્રણવેન્દુવહ્નિરવિસહસ્રનેત્રાય પુરુષાય
પુરુષરૂપાય વાસુદેવાય નમો નમઃ ।
ય ઇદં ગોપાલહૃદયમધીતે સ બ્રહ્મહત્યાયાઃ પૂતો ભવતિ ।
સુરાપાનાત્ સ્વર્ણસ્તેયાત્ વૃષલીગમનાત્ પતિ સમ્ભાષણાત્
અસત્યાદગમ્યાગમનાત્ અપેયપાનાદભક્ષ્યભક્ષણાચ્ચ પૂતો ભવતિ ।
અબ્રહ્મચારી બ્રહ્મચારી ભવતિ । ભગવાન્મહાવિષ્ણુરિત્યાહ ।
॥ ઇતિ ગોપાલહૃદયસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

.. gopAlahRidayastotram ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*